तवाष्टकमिदं मुदा पठति सूरसूते सदा,
समस्तदुरितक्षयोभवति वै मुकुंदे रतिः ।
तया सकलसिद्धयो मुररिपुश्च संतुष्यति,
स्वभावविजयो भवेद्वदतिवल्लभः श्रीहरेः ॥ ९ ॥

इति श्रीवल्लभाचार्यविरचितं श्रीयमुनाष्टकस्तोत्रं संपूर्णम् ।

## ॥ अथ बालबोधः ॥

श्री कृष्णाय नमः ॥

नत्वा हरिं सदानंदं सर्वसिद्धान्तविग्रहम् ।
बालप्रबोधनार्थाय वदामि सुविनिश्चितम् ॥ १ ॥

धर्मार्थकाममोक्षाख्याश्चत्वारोऽर्था मनीषिणाम् ।
जीवेश्वरविचारेण द्विधा ते हि विचारिताः ॥ २ ॥

अलौकिकास्तु वेदोक्ताः साध्यसाधनसंयुता ।
लौकिकाऋषिभिः प्रोक्तास्तथैवेश्वरशिक्षया ॥ ३ ॥

लौकिकांस्तुप्रवक्ष्यामि वेदादाद्या यतः स्थिताः ।
धर्मशास्त्राणि नीतिश्च कामशास्त्राणि च क्रमात् ॥ ४ ॥

त्रिवर्गसाधकानीति न तन्निर्णय उच्यते ।
मोक्षे चत्वारि शास्त्राणि लौकिके परतः स्वतः ॥५॥

द्विधा भेदे स्वतस्तत्र सांख्ययोगौ प्रकीर्तितौ ।
त्यागात्यागविभागेन सांख्ये त्यागः प्रकीर्तितः ॥६॥

अहंताममतानाशे सर्वथा निरहंकृतौ ।
स्वरूपस्थो यदा जीवः कृतार्थः स निगद्यते ॥७॥

तदर्थप्रक्रिया काचित् पुराणेऽपि निरूपिता ।
ऋषिभिर्बहुधा प्रोक्ता फलमेकमबाह्यतः ॥८॥

अत्यागे योगमार्गो हि त्यागोऽपि मनसैव हि ।
यमादयस्तु कर्तव्याः सिद्धे योगे कृतार्थता ॥९॥

पराश्रयेण मोक्षस्तु द्विधा सोऽपि निरूप्यते ।
ब्रह्मा ब्राह्मणतां यातस्तद्रूपेण च सेव्यते ॥१०॥

ते सर्वथा न चाद्येन शास्त्रं किंचिदुदीरितम् ।
अतः शिवश्च विष्णुश्च जगतो हितकारकौ ॥११॥

वस्तुनः[1] स्थितिसंहारौ कार्यौ शास्त्रप्रवर्तकौ ।
ब्रह्मैव तादृशं यस्मात् सर्वात्मकतयोदितौ ॥१२॥

निर्दोषपूर्णगुणता तत्तच्छास्त्रे तयोः कृता ।
भोगमोक्षफले दातुं शक्तौ द्वावपि यद्यपि ॥१३॥

भोगः शिवेन मोक्षस्तु विष्णुनेति विनश्चयः ।
लोकेऽपि यत्प्रभुर्भुंक्ते तन्न यच्छति कर्हिचित् ॥१४॥

---

१ वस्तुनः स्थितिसंहारे कार्ये । वस्तुस्थितौ च संहारे कार्ये,

अतिप्रियाय तदपि दीयते क्वचिदेव हि ।
नियतार्थप्रदानेन तदीयत्वं तदाश्रयः ॥१५॥
प्रत्येकं साधनं चैतत् द्वितीयार्थे महान् श्रमः ।
जीवाः स्वभावतो दुष्टा दोषाभावाय सर्वदा ॥१६॥
श्रवणादिकृतः प्रेम्णा सर्वं कार्यं हि सिध्यति ।
मोक्षस्तु सुलभो विष्णोर्भोगश्च शिवतस्तथा ॥१७॥
समर्पणेनात्मनो हि तदीयत्वं भवेद् ध्रुवम् ।
अतदीयतया चापि केवलश्चेत्समाश्रितः ॥१८॥
तदाश्रयतदीयत्वबुद्ध्यै किंचित् समाचरेत् ।
स्वधर्ममनुतिष्ठन् वै भारद्वैगुण्यमन्यथा ।
इत्येवं कथितं सर्वं नैतज्ज्ञाने भ्रमः पुनः ॥१९॥

इति श्रीवल्लभाचार्यविरचितो बालबोधः संपूर्णः ।

# अथ सिद्धांतमुक्तावली ।

श्रीकृष्णाय नमः ।

नत्वा हरिं प्रवक्ष्यामि स्वसिद्धांतविनिश्चयम् ।
कृष्णसेवा सदा कार्या मानसी सा परा मता ॥१॥
चेतस्तत्प्रवणं सेवा तत्सिद्ध्यै तनुवित्तजा ।
ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधनम् ॥२॥

१ विष्णोः सुलभो इति पा०.